# मुनि विनयवर्धनलिखित
# एक विज्ञप्तिपत्र

– मुनि रत्नकीर्तिविज

ओळी स्वरूपे प्राप्त थयेल हस्तलिखित पत्रमां आ विज्ञप्तिका छे. ४८ श्लो
**प्रमाण** आ विज्ञप्तिपत्रना आगला भागमां ३८ श्लोक छे. अने बाकीना श्लोको पाछळ
भागमां छे.

तपगच्छीय आचार्य श्रीविजयसिंहसूरि महाराजने तेमना श्रीविनयवर्धन नाम
शिष्ये लखेलो आ विज्ञप्तिपत्र छे. गुरुभगवंत मेडतामां बिराजमान छे अने पोते थराद
चातुर्मास रह्या छे. जिनेश्वरनां चैत्य, जिन प्रतिमा, नगर वगेरेनुं वर्णन तथा चातुर्मा
दरम्यान पोते करेला स्वाध्याय वगेरेनी वात तथा पर्युषणा पर्वमां थयेल आराधनादि
वात आमां करेली छे.

एकाक्षरवृद्धिए छन्दोबद्ध अने काव्यमय विज्ञप्ति, लेखकनी संस्कृत साहि
तथा काव्य अलंकारादि विशेनी विद्वत्तानी द्योतक बने छे. एक–बे–त्रण एम वर्धमानाक्ष
लखाएला श्लोकोमां लगभग प्रत्येक अक्षरना बे बे श्लोको छे.

श्लोक ४३मां ४ अक्षर जेटली जग्या छोडी देवामां आवी छे अने क्यां
क्यांक अशुद्धि होवाने लीधे मूळ विज्ञप्तिपत्रनी नकल होवानुं जणाय छे. घणा शब
उपर अर्थनी स्पष्टता हेतु तेनो पर्याय शब्द मूकेलो छे. जे अत्रे टिप्पणमां आपेल छे. व
छंदःशास्त्रना ग्रंथमांथी छंदो मेळववानो प्रयत्न कर्यो छे. ते पण टिप्पणरूपे आपेल
तेमां श्लोक १२, १३, १४, १७, २९, ३६, ४३, ४४, अने ४६ आटलाना छंदो प्राप्त
शक्या नथी । 'छंदोनां नाम श्लोकमां ज होवा जोईए' एवो पूज्य श्रीशीलचन्द्र
महाराजनो निर्देश एमना कह्या अनुसार छंदनी शोध करता करता वास्तविक पुरवार थ
एटले जे छंदो हुं मेळवी न शक्यो ते पण ते श्लोकोमां हशे ज एवी संभावना छे ते
आ विषयना विद्वज्जनोने जणाववा विनंति करुं छुं.

विज्ञप्तिपत्रमां छेल्ले 'सं १७०१ वर्षे' एवो उल्लेख छे. जे लेखनकाल जण
छे. एटले विज्ञप्तिपत्र ते पहेलां लखायो होय तेम शक्यता छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्ति श्रीशं देवाऽधीशं, स्वस्ति श्रीकं स्तोष्येऽस्तेयम् ।
स्वस्ति श्रीदं भव्यध्येयं, स्वस्ति श्रीकारं नाभेयं ॥१॥

**अथ वर्ध्दमानाक्षर :**

ना कम् द्या कम् ॥१॥[1]
श्री वित् । मेऽर्हन् ॥२॥[2] यमम् ॥
आद्यो हृद्य: । सद्योऽवद्य ॥३॥[3]
छिन्द्याद्वन्द्यो मेऽस्त्री छंद[4] : ॥४॥[5] यमम् ॥
आदीशो दीनेशः। नाकीशोऽकीनाश : ॥५॥[6]
यस्स्नातो नारीभिः । विख्यातस्तं सेवे ॥६॥[7] यमम् ॥
श्रीसार्वीया काम्या काया । मत्यामेया धीराधेया ॥७॥[8]
पास्तामाया सौवर्णाया । कन्याजेयाऽप्यन्ते हेया ॥८॥[9]
केवलिभाषा धर्मविभाषा । पाप्मजिगीषा शब्दविशेषा ॥९॥[10]
योजनशक्तिः भाविकभक्तिः । नम्रनृपङ्क्तिः व्याकृतवृत्तिः ॥१०॥[11]
जिनवरचेतः त्रिभुवननेतः । घनकमनाभिः शशिवदनाभिः ॥११॥[12]
देवीभिरनिशं नीतं न च वशं । वर्य्यं वसुमती-नाथाऽपचितते ॥१२॥
प्रसृताज्ञा[13] समाज्ञा कमनी तावकीना ।
प्रसृता हंसमाला धवला[14] साऽसमासा[15] ॥१३॥
सानन्दा कृतनन्दा या रामा घननादा ।
सालङ्कारविदोषा सश्लेषा मदलेषा ॥१४।
चित्रपदा नयभेदा [16]काव्यविशेषविनोदा ।
सज्जनसन्ततिनव्या काव्यकृतां किल [17]काव्या ॥१५॥[18]
ततोत्तमप्रमाणिका प्रशस्तरोमराजिका
विहाय तां प्रव्रज्यया स सिद्ध इष्टसिद्धये ॥१६॥[19] कलापकम् ॥
कामिनीप्रगीतकीर्तनं नाकिनित्यकृत्यनर्त्तनम् ।
विश्वपङ्कपुञ्जकर्तनं देशनापयोदगर्जनम् ॥१७॥

---

१ २. श्रीवृत्तम् । ३. स्त्रीवृत्तम् । ४. छन्दो वशेऽभिप्राये चेत्यादिवचनात् । ५. स्त्रीवृत्तम् । ६-७ नारीवृत्तम् । ८-९. कन्यावृत्तम् । १०-११. पङ्क्तिवृत्तम् । १२. शशिवदनावृत्तम् । १३. यशः । १४. सज्ज्य । १५. बांधव्या । १६. ग्रन्थ । १७. मति । १८. चित्रपदावृत्तम् । १९. प्रमाणिकावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टमी[1]यजतचन्द्रिका [2]गोधिका नयनभद्रिका ।
यस्य तं प्रणतिपद्धतिं भारुदेवमिह सादरात् ॥१८॥[3] यमम् ॥
सुधरणी विहारधोरणी सित[4]सुधासुधा[5]धराधरा[6] ।
ध्वजपटीमनोरमा रमा जयति यत्र मेदिनीपुरे ॥१९॥[7]
यत्र चकास्त्यप्रीणनचर्चा केसरकस्तूरीविहितार्चा ।
चम्पकमालालङ्कृतमूर्ता[8] रुक्मवती तीर्थङ्करमूर्त्तिः[9] ॥२०॥[10]
कृतसुकृत[11]यतिसभा[12] वृत्ता[13] कृतसु[14]कृतयतिसभाऽऽवृत्ता ।
भवभुवन[15]पतितरी[16] यस्यां दिदिवि[17]कुटनवविमानं वा ॥२१॥[18]
[19]आर्षभिना[20]काऽऽकृतिकरणीया या नगरी नागररमणीया ।
मौक्तिकमाला वसुसुकुमारा सा रमणीवा विलसति सारा ॥२२॥[21]
[22]विपणिततिर्विपणा[23]लिमण्डिता [24]सुविपणिरा[25]पेणिकाऽ[26]विखण्डिता ।
शुभमतिमर्त्तविभूतिदायिनी प्रजयति चित्रलतेव यत्र किम् ॥२३॥
यतिनिघसविहायिते[27]भाविनी रमणचरणतामरसाऽलिनी ।
सविरतिरतिरूपगुणोज्ज्वला[28] निवसति पुरि यत्र सदास्तिका ॥२४॥[29]
चकास्ति कास्तिकरमणी रमाकृतिः
सतीव सत्यधृतमतिर्दिताऽधृतिः ।
यदा तदा सुकृतपरायणा परा
प्रशस्तसंस्तवरुचिरा सदाऽऽदरा ॥२५॥[30]
अतिरससरसी सारवाऽसारिका
सजलजलजजीवा परावाटिका ।
परमपुरुषतीर्था क्षमाधिष्ठिता
सफलफलदराजी वरा वर्तते ॥२६॥[31]
जिनपवसतिदण्डता तिथिहानिता
दशवदननिवेशन स्वपराजिता ।
क्षितिजननवियोगता कचबन्धनं
विकिरगणसरोगता रिपुनाशनम् ॥२७॥[32]

---

१. चन्द्र। २. भालम्। ३. भद्रिकावृत्तम्। ४. छोह ?। ५. चन्द्र। ६. हीना। ७. मनोरमावृत्तम्। ८.काया। ९. प्रतिमा। १०. रुक्मवतीवृत्तम्। ११. शुभ। १२. गृह। १३. वर्तुला तथा दृढा। १४. पुण्य। १५. जल। १६. नावा १७. स्वर्ग। १८.वृत्तावृत्तम्। १९.भरत। २०.स्वर्ग। २१.अनुकूलावृत्तम्। २२.हट्ट। २३.विक्रय २४.शोभनविक्रेय। २५.वणिक्। २६.पूर्णा। २७.मालतीवृत्तम्। २८.दान। २९.उज्ज्वलावृत्तम्। ३०.रुचिरावृत्तम् ।३१.चन्द्रिकाकृत्तम्। ३२.अपराजिता वृत्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्वाहकालकरपीडनमित्यभावे
यस्मिन्नभूद्विषयपूर्वकमन्यथा न ।
श्रीश्रीमति प्रवरपट्टनमेडताख्ये
सिंहोद्धताऽत्र भवदङ्घ्रिरजष्पवित्रे ॥२८॥[१]
यत्र स्थिराद्रनगरे नगतुङ्ग केतनं
श्रीमारुदेव जिननायकसन्निकेतनम् ।
वादित्रदुन्दुभिमृदङ्गकनादनर्तनं
सिन्धूत्थमण्डलमभादिव वृत्तमण्डनम् ॥२९॥
पटुकटुकमतमयमकरनगरं
तदपि सुगुरुगुरुगुणजपनम् ।
जयति मणिगुणनिकरजनभवनं[२]
स्रगिव नरनिगरण इह जगति यत् ॥३०॥[३]
संसृतितारणतत्परधर्ममतिप्रतति:[४]
पात्रसुपात्रयतिप्रति[५]पादनरागवती ।
श्रावक जावड-भावड-सम्प्रतिकृत्यकृति:[६]
यत्र विभाति सदार्हतसंहतिरश्वगतिः ॥३१॥[७]
सदाऽस्तिका प्रशस्तिका सदास्तिका प्रशस्तिका ।
यथा यथा तथा तथा स्वराऽऽनरालिकाऽऽलिका ।
निरस्तपञ्चचामरा प्रशस्तपञ्चचामरा
ऽबृहद्विकर्णिकाभिधानतस्ततः स्थिराद्रतः ॥३२॥[७]
सहर्षपुलकोल्लसत्करणमेदुरानिन्द्रियो
विधाय मितवन्दनं विधिवदग्रपृथ्वीदृशा ।
ललाटघटितस्वपाणि रचयत्ययं हर्षितो
विनेय विनयादिवर्ध्दन इतीह विज्ञप्तिकाम् ॥३३॥[८]
दिवानाथे नाथे दिदिविनिलयानां शिखरिणी-
श्वरे पद्मानां भास्वति सति विभाते प्रतिदिनम् ।

---

१. सिंहोद्धतावृत्तम् । २. गृहम् । ३. स्रग्वृत्तम् । ४. लता । ५. दान । ६. कार्य । ७. अश्वगतिवृत्तम् ।
८. पञ्चचामरवृत्तम् । ८. पृथ्वीवृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा ...... सदसि सुगुरूपासकसभा
सदिभ्यश्रेणीहर्षपुषि सकलामर्षमुषि सत् ॥३४॥[१]
चरमसमयवीरदन्तालयोत्पत्तिसारोत्तरा-
ध्ययनविरचना सवृत्तिप्रियाख्यानमध्यापनम् ।
भवजलनिधितारकादिष्टप्रज्ञापनावाचनं
वरमिति सुकृतं वरीवर्ति श्रीभवन्नामतः ॥३५॥[२]
[३]वृष[४]चन्द्र[५]कुलोत्तमे क्रमागत इति भीत्यभावे
प्रियपर्युषणाभिधानपर्वणि[६]समपर्वरत्ने ।
सुनवक्षणकल्पसूत्रवाचनमुषसि द्विसन्ध्यं [७]
सुतपस्तपनं वनीपकद्रविणविसर्जनं सत् ।
परमार्हतपोषणं मुदाऽभवद् ऋषिपर्वकृत्यं
भवदत्र भवत्क्रमस्मृतिप्रभव[८]वृषप्रभावात् ॥३६॥
तपागच्छाधीशो जयति जगदानन्ददानप्रसक्तो[९]
निजोत्पत्तिक्ष्मायां किल विजयसिंहाह्वयः सूरिराजः ।
जगत्या मत्या वा कृतगजजयस्वीययाथार्थ्यगोत्रा -
दनूचानस्वामी परिवृढनतो मेघविस्फूर्जितायाः ॥३७॥[१०]
स्वाहा[११]जक्षणवेश्मनी[१२]न्द्रभवनस्तम्बेरमाऽश्वादयो
मध्यस्थे शशिचन्द्रिकाहिम[१३]कुभृद्वक्त्रा[१४](च्चक्रा)ङ्गदुग्धादयः ।
पाताले बलिकुण्डनागपतयो जानेऽवदाता यत
स्त्रैलोक्ये यशसस्तवैष गणभृच्छार्दूलविक्रीडितम् ॥३८॥[१५]
श्रीनाथूवंशनक्षत्र[१६]सृतिदिनमणीनां कीर्तिललना
राढापूर्णात्मजैवातृकघृणिकमनी येषामतिरसात् ।
अष्टाऽऽशा[१७]यां प्रगीता मनुजसुवदना योषाभिरभवत्
श्रोतुं जानीमहे किं जगति किल विधाताऽष्टश्रुतिरयम् ॥३९॥[१८]

---

१. शिखरिणीवृत्तम् । २. नाराचवृत्तम् । ३. धर्म । ४. चन्द्रशब्दः द्योतक : । ५. प्रशस्य । ६.सर्व । ७. वेलम् । ८.पुण्य । ९. तत्परः। १०. मेघ विस्फूर्जितावृत्तम् । ११. देव । १२. गृह । १३. पर्वत । १४. हंस । १५.शार्दूलविक्रीडितवृत्तम् । १६. नभः । १७. दिशि । १८. सुवदनावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिग्जये पराजितो रवी रसाधराधिपो
ऽपरो विपक्ष आनतार्हतप्रसन्नचित्त ते ।
ज्वलत्प्रतापभूघनेन [2]मन्दरोऽदरं ग्रहा-
धिभूरपास्तवीर्यपक्षमूलमद्य मूर्च्छितो
रथस्थितो भ्रमन्नजस्रमस्त्यपीष्टवृत्तपूज्य ॥४०॥[3]
तुच्छाऽस्वच्छाऽन्यगच्छाधिपतिगजघटामत्तमातङ्गशत्रो[4] ।
पौंस्त्रस्त्रैणोपदेशाऽमृतशमितजगत्पापतापात्रिलोक्याम् ।
नित्यश्लोकप्रतापौ शशिरविमिषतस्ते ततस्तेजपुञ्जौ
श्रीमानृग्रामगीतौ नरधृतशिरआज्ञागुरुस्रग्धरायाम् ॥४१॥[10]
नायकदेतनूजनन ! वंशरत्न ! [11]वदनं गुणालयमहो ।
भद्रकरं प्रभाप्रसरपेशलं जयति ते गुरो वरतरम् ।
येन जितं वने [12]कुवलयं गतं सृजति सत्तपः प्रतिदिनं
आगलमग्नमत्र [13]भवदाननोपमितिसिद्धयेऽशनजलम् ॥४२॥[14]
चकास्ति कनकावदातमतुलं शरीरं गुरो ! तावकीनं मुदा
सदार्हतयतीशितोऽवनतम [15]र्तवृन्दारक स्पर्द्धया येन वा ।
जितो विषमसायकोऽत्यसुखदायकस्तीव्रकोपादनङ्गीकृतो
यतो हि महता सह....... विग्रहोऽनर्थकार्थं भवेत् ॥४३॥
सौभाग्यालय ! वीतविभ्रमगते ! गम्भीररत्नाकरप्रसरत्तलं
लब्धाऽऽप्ताऽऽगमपारसिद्धविदुषा मेमीयते तथापि[16] तव प्रभो ! ।
सत्पाटीगणितार्थदक्षकविना ताराऽन्तरीक्षे[17] गुरु(परि)पन्थिभि -
[18]र्विश्वे लान्त्यमिवा ङ्गुलैर्गजधरैर्न[19] क्षत्रपद्येव लब्धिगुरो गुरो ॥४४॥
सम्प्रति सिद्धार्थाङ्गज[20] [21]दन्तालयवचन [22]सृतिचरण [23]करणरते
तत्रभवत्पादोदक[24] जन्मद्वयमुषसि किल नमति नरनिकरः ।
यो भवतां तस्याऽवसथ[25] प्राङ्गण[26] इह विलसति वरविबुधनगो[27]
[28]ऽक्रोञ्चपदा पद्मापि मरुद्रत्नमसमगुणगणकलित ! वरमते ! ॥४५॥[29]

---

१. पर्वत । २. मेरुः । ३. पञ्चचामरवृत्तम् । ४. हस्ति । ५. नरेभ्यो हितम् । ६. स्त्रीभ्यो हितम् । ७. स्त्री । ८. बृहत् । ९. माला । १०. स्रग्धरावृत्तम् । ११. जन्म । १२. पत्रम् । १३. पूज्य । १४. भद्रकवृत्तम् । १५. नर । १६. अपि निश्चियार्थे । १७. बृहत् । १८. समग्र । १९. नभः । २०. वीर । २१. मुख । २२ मार्ग । २३ चारित्र । २४. पद्य । २५. गृह । २६. जगति । २७. कल्पवृक्षः । २८. श्रेष्ठ । २९. क्रौञ्चपदावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीभट्टारकाऽनु[1]त्तरकभट्टारकवरविजयदेवसूरिसदन्तिके
योनूचानरत्नं विजयसिंहो गुरुगुणर[2]सजरोहणाचलसंस्तवे[3]: ।
पट्टालङ्कृतिस्तीर्थपतिवीरक्रमणकजसविधे यथा किल भासते
पात्रं गौतमोऽयं गणधरो मानुषकलुषपवनाशने भुजगेरितम् ॥४६॥
इति गुणगणराजितानां मतानां हितानां हि तेषां प्रसादान्वितानां सतां
निजकरणपरिच्छद[4]क्षेत्रवार्त्तप्रवृत्ति[5]प्रतीतोऽत्र लेखो विशेषेहितः ।
मम हरिषक[6]रालिकाम्भोदसच्चण्डवृष्टि[7]प्रपातो यतोऽतो भविष्यत्यरं
मतिमितगुरुभि[8]र्गरीयस्तरैस्तातपादैः प्रसद्य प्रसाद्योऽनवद्यो[9]हितः ॥४७॥[10]
शिशुनमतिरवधार्यस्त्रिसायं तथा तातपादाब्जनिर्ग्रन्थभृङ्गावलीना-
मनुनमति-नमती मे प्रसाद्याविहत्यानगारार्हतानां प्रणामोऽवधार्य ।
वितथविततकवित्वाक्षरार्थभ्रमौचित्यबन्धप्रबद्धं मया मौर्ख्यतो यत्
[11]प्रचितक[12]सहनपूज्यैश्च सोढव्य[13]भूर्ज्जाख्यमासे सितोऽलेखि लेखोऽथ भद्रम् ॥४८॥[14]

सं. १७०१ वर्षे ॥

---

१. उत्तम । २. मणि । ३. वर्णना । ४. वपुः । ५. सहितः । ६. वृक्षः । ७. प्राप्तः । ८. बृहस्पतिः । ९. शिल्पकृत् । १०. चण्डवृष्टिप्रपातवृत्तम् । ११. याऽऽस । १२. क्षमा । १३. कार्तिक । १४. चण्डवृष्टिप्रपातवृत्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org